# 11 दूतवाक्यम्

## पात्र-परिचय

**दुर्योधनः** – कुरुराजः
**काञ्चुकीयः** – दुर्योधनस्य भृत्यः बादरायणः
**वासुदेवः** – पाण्डवदूतः श्रीकृष्णः

**(ततः प्रविशति काञ्चुकीयः)**

**काञ्चुकीयः** – भो भोः प्रतीहाराधिकृताः ! महाराजो दुर्योधनः समाज्ञापयति–अद्य सर्वैः पार्थिवैः सह मन्त्रयितुम् इच्छामि! तदाहूयन्तां सर्वे राजानः इति (परिक्रम्य अवलोक्य) अये! अयं महाराजो दुर्योधनः इत एवाभिवर्तते।

**(ततः प्रविशति यथानिर्दिष्टो दुर्योधनः)**

**काञ्चुकीयः** – जयतु महाराजः! महाराजशासनात् समानीतं सर्वं राजमण्डलम्।

**दुर्योधनः** – सम्यक् कृतम्। प्रविश त्वम् अवरोधम्।

**काञ्चुकीयः** – यदाज्ञापयति महाराजः। (निष्क्रान्तः, पुनः प्रविश्य)

**काञ्चुकीयः** – जयतु महाराजः। एष खलु पाण्डवस्कन्धावारात् दौत्येनागतः पुरुषोत्तमः नारायणः।

**दुर्योधनः** – मा तावद् भोः बादरायण! किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः। स गोपालकस्तव पुरुषोत्तमः। बार्हद्रथापहृत विजयकीर्तिभोगः तव पुरुषोत्तमः। अहो! पार्थिवासन्नमाश्रितस्य भृत्यजनस्य समुदाचारः। क एष दूतः प्राप्तः।

**काञ्चुकीयः** – प्रसीदतु महाराजः। दूतः प्राप्तः केशवः।

**दुर्योधनः** – केशवः इति । एवमेष्टव्यम् । अयमेव समुदाचारः। भो भोः राजानः! दौत्येनागतस्य केशवस्य किं युक्तम्। किमाहुर्भवन्तः 'अर्घ्यप्रदानेन पूजयितव्यः केशवः' इति। न मे रोचते। ग्रहणे अत्र अस्य हितं पश्यामि। ग्रहणमुपगते तु वासुदेवे हृतनयना इव पाण्डवा भवेयुः। गतिमतिरहितेषु पाण्डवेषु क्षितिरखिलापि भवेन्ममासपत्ना। अपि च योऽत्र केशवस्य प्रत्युत्थास्यति स मया द्वादशसुवर्णभारेण दण्ड्यः। तदप्रमत्ता भवन्तु भवन्तः। कोऽत्र भोः।

**काञ्चुकीयः** – जयतु महाराजः।

**दुर्योधनः** – बादरायण! आनीयतां स विहगवाहनमात्रविस्मितो दूतः।

**काञ्चुकीयः** – यदाज्ञापयति महाराजः।

**दुर्योधनः** – वयस्य कर्ण!

***प्राप्तः किलाद्य वचनादिह पाण्डवानां***
***दौत्येन भृत्य इव कृष्णमतिः स कृष्णः।***
***श्रोतुं सखे त्वमपि सज्जय कर्ण कर्णौ***
***नारीमृदूनि वचनानि युधिष्ठिरस्य।।***

**(ततः प्रविशति वासुदेवः काञ्चुकीयश्च)**

**वासुदेवः** – अद्य खलु धर्मराजवचनात् मित्रतया चाहवदर्पम् अनुक्तग्राहिण दुर्योधनं प्रति मयापि अनुचितदौत्य समयोऽनुष्ठितः।

*दुष्टवादी गुणद्वेषी शठः स्वजननिर्दयः।*
*सुयोधनो हि मां दृष्ट्वा नैव कार्यं करिष्यति।।*

भो बादरायण! अपि प्रवेष्टव्यम्?

**काञ्चुकीयः** – अथ किम् अथ किम्। प्रवेष्टुमर्हति पद्मनाभः।

**वासुदेवः** – (प्रविश्य स्वगतम्) कथं कथं मां दृष्ट्वा सम्भ्रान्ताः सर्वे क्षत्रियाः। (प्रकाशम्) अलमलं सम्भ्रमेण, स्वैरमासतां भवन्तः।

**दुर्योधनः** – कथं कथं केशवं दृष्ट्वा सम्भ्रान्ताः सर्वे क्षत्रियाः। अलम् अलम् सम्भ्रमेण। स्मरणीयः पूर्वमाश्रावितो दण्डः। ननु अहम् आज्ञप्ता।

**वासुदेवः** – भोः सुयोधन! किं भणसि।

**दुर्योधनः** – (आसनात् पतित्वा आत्मगतम्) सुव्यक्तं प्राप्त एव केशवः।

*उत्साहेन मतिं कृत्वाप्यासीनोऽस्मि समाहितः।*
*केशवस्य प्रभावेण चलितोऽस्म्यासनादहम्।।*

अहो! बहुमायोऽयं दूतः। (प्रकाशम्) भो दूत! एतदासनमास्यताम्।

**वासुदेवः** – आचार्य! आस्यताम्! गाङ्गेयप्रमुखा राजानः! स्वैरम् आसतां भवन्तः। वयमपि उपविशामः। (उपविशति)।

**दुर्योधनः** – *धर्मात्मजो वायुसुतश्च भीमो भ्रातार्जुनो मे त्रिदशेन्द्रसूनुः।*
*यमौ च तावश्विसुतौ विनीतौ सर्वे सभृत्याः कुशलोपपन्नाः।।*

**वासुदेवः** – कुशलिनः सर्वे भवतो राज्ये शरीरे च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति–

*अनुभूतं महद्दुखं सम्पूर्णः समयः स च।*
*अस्माकमपि धर्म्यं यद् दायाद्यं तद् विभज्यताम्।।*

**दुर्योधनः** – कथं कथं दायाद्यमिति। भो दूत! न जानाति भवान् राजव्यवहारम्–

*राज्यं नाम नृपात्मजैस्सहृदयैर्जित्वा रिपून् भुज्यते।*
*तल्लोके न तु याच्यते न च पुनर्दीनाय वा दीयते।*
*कांक्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसम्।*
*स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम्।।*

**वासुदेवः** – भोः सुयोधन! अलं बन्धुजने परुषमभिधातुम्–

*कर्त्तव्यो भ्रातृषु स्नेहो विस्मर्त्तव्या गुणेतराः।*
*सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि।।*

**दुर्योधनः** – *देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत्।*
*पिष्टपेषणमेतावत् पर्याप्तं छिद्यतां कथा।।*

**वासुदेवः** – भोः सुयोधन! किं न जानासि अर्जुनस्य पराक्रमम्।

**दुर्योधनः** – न जानामि।

**वासुदेवः** – भोः श्रूयताम्, एकेनैव अर्जुनेन तदा विराट्नगरे भीष्मादयो निर्जिताः। अपि च चित्रसेनेन नभस्तलं नीयमानस्त्वं फाल्गुनेनैव मोचितः। अतः–

*दातुमर्हसि मद्वाक्याद् राज्यार्धं धृतराष्ट्रज।*
*अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः।।*

**दुर्योधनः** – कथं कथं हरिष्यन्ति हि पाण्डवाः –

*प्रहरति यदि युद्धे मारुतो भीमरूपी*
*प्रहरति यदि साक्षात्पार्थरूपेण शक्रः।*
*परुषवचनदक्षर! त्वद्वचोभिर्न दास्ये*
*तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये।।*

**वासुदेवः** – भोः कुरुकुलकलङ्कभूत!

**दुर्योधनः** – भोः गोपालक!

**वासुदेवः** – भोः सुयोधन! ननु क्षिपसि माम्।
**दुर्योधनः** – आः अनात्मज्ञस्त्वन्। अहं कथयामि यद् भवद्विधैः सह न भाषे।
**वासुदेवः** – भोः शठ! त्वदर्थात् अयं कुरुवंशः अचिरान्नाशमेष्यति। भो भो राजानः! गच्छाम स्तावत्।
**दुर्योधनः** – कथं यास्यति किल केशवः। भोः दुःशासन! दूतसमुदाचारमतिक्रान्तः केशवः बध्यताम्। मातुल! बाध्यतामयं केशवः। कथं पराङ्मुखः पतति। भवतु अहमेव पाशैर्बध्नामि (उपसर्पति)।
**वासुदेवः** – कथं बद्धुकामो मां किल सुयोधनः। भवतु, सुयोधनस्य सामर्थ्यं पश्यामि। (विश्वरूपमास्थितः)।
**दुर्योधनः** – भो दूत!

***सृजसि यदि समन्ताद् देवमायाः स्वमायाः***
***प्रहरसि यदि वा त्वं दुर्निवारैस्सुरास्त्रैः।***
***हयगजवृषभाणां पातनाज्जातदर्पो***
***नरपतिगणमध्ये बध्यसे त्वं मयाद्य।।***

आः तिष्ठ इदानीम्। कथं न दृष्टः केशवः? अहो ह्रस्वत्वं केशवस्य। आः तिष्ठः इदानीम्। कथं न दृष्टः केशवः! अहो दीर्घत्वं केशवस्य। कथं न दृष्टः केशवः! अयं केशवः। कथं सर्वत्र शालायां केशवा एव केशवाः दृश्यन्ते! किम् इदानीं करिष्ये! भवतु, दृष्टम्। भो राजानः! एकेन एकः केशवः बध्यताम्। कथं स्वयमेव पाशैर्बद्धाः पतन्ति राजानः!

**(निष्क्रान्ताः सर्वे)** **(दूतवाक्यम्)**

# अभ्यास प्रश्न

## लघु उत्तरीय प्रश्न

१. दुर्योधनः कर्णं किम् अवोचत्?
२. श्रीकृष्णः दुर्योधनस्य राजसभां कथम् अगच्छत्।
३. श्रीकृष्णं दृष्ट्वा राजसभायां नृपाणां का दशा अभवत्?
४. दुर्योधनः कस्य प्रभावेण आसनात् चलितोऽभवत्?
५. दुर्योधनः श्रीकृष्णं कथं बद्धुं न शशाक?
६. श्रीकृष्णः कस्य समीपे दौत्येन गतः?
७. श्रीकृष्णः दुर्योधनस्य किम् अपरम् नाम वदति?
८. कः पाण्डवः दूतः अभवत्? **[2020 ZC]**
९. श्रीकृष्ण दूतरूपेण कुत्र गतः?
१०. राज्यदान विषये दुर्योधनः किम् अकथयत्?
११. दुर्योधनः श्रीकृष्णं किम् अपृच्छत्?
१२. दुर्योधनः कः आसीत्? **[2019 CQ]**

## अनुवादात्मक प्रश्न

१. **निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**
(क) मा तावद्................................ एष दूतः प्राप्तः।
(ख) दुर्योधनः –केशवः ....................... भवेन्ममासपत्ना।
(ग) राज्यं नाम .................................. शमायाश्रमम्।
(घ) भो भोः राजानः ............................... कोऽत्र भोः।

(ङ) प्रहरति यदि युद्धे ...................... वीर्यगुप्ते स्वराज्ये। **[2017 MI]**

(च) सृजसि ................................................ मयाद्य।

(छ) प्राप्त: किलाद्य................................ युधिष्ठिरस्य। **[2017 MH, MK]**

(ज) कर्त्तव्यो भ्रातृषु........................... लोकयोरुभयोरपि।

(झ) आतिष्ठ इदानीम् ............ पार्शैबद्धा: पतन्ति राजान:।

(ञ) आ: तिष्ठ इदानीम्........................ पतन्ति राजान:। **[2020 ZE]**

**२. निम्नलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**

(क) नारीमृदूनि वचनानि युधिष्ठिरस्य।

(ख) सम्बन्धो बन्धुभि: श्रेयान् लोकयोरुभयोरपि।

अथवा कर्त्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतरा:।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(क) श्रीकृष्ण महापुरुष थे।

(ख) श्रीकृष्ण पाण्डवों के हितैषी थे।

(ग) दुर्योधन ईर्ष्यालु था।

(घ) भाइयों से स्नेह करना चाहिए।

## व्याकरणात्मक प्रश्न

**१. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—**

यदाज्ञापयति, दौत्येनागत:, पुरुषोत्तम:।

**२. निम्नलिखित शब्दों में प्रत्यय बताइए—**

पूजयितव्य:, स्मरणीय:, पृष्ट्वा।

## शब्दार्थ

**अद्य** = आज। **दौत्येन** = दूतरूप में। **बार्हद्रथापहृतविजयकीर्तिभोग:** = (बार्हद्रथ + अपहृत-विजय-कीर्ति-भोग:) जरासन्ध द्वारा अपहृत विजय-कीर्ति-भोगवाला। **पार्थिवासन्नमाश्रितस्य** = (पार्थिव + आसन्नम् + आश्रितस्य) राजाओं के समीप रहनेवाले। **युक्तम्** = उचित। **हृतनयना:** = नेत्रहीन। **क्षितिरखिलापि भवेन्ममासपत्ना** = (क्षिति: + अखिला + अपि भवेत् + मम असपत्ना > अखिला अपि क्षिति: मम असपत्ना भवेत्) समस्त पृथ्वी मेरे लिए शत्रुओं से रहित हो जायगी। **योऽत्र** = (य: + अत्र) जो यहाँ। **प्रत्युत्थास्यति**= खड़ा होगा। **द्वादशसुवर्णभारेण** = बारह सुवर्ण-मुद्राओं से। **अप्रमत्ता:** = सावधान। **विहगवाहनमात्रविस्मित:** = पक्षी के वाहन-मात्र से गर्वीले। **कृष्णमति:** = काली (कुटिल) बुद्धिवाला। **सज्जय** = तैयार कर लो। **दौत्येन** = दूत के रूप में। **कृष्णमति** = काली (कुटिल) बुद्धिवाला। **नारीमृदूनि** = नारियों के समान कोमल। **चाहवदर्पम्**– च + आहवदर्पम् = युद्ध का घमण्ड रखनेवाला। **अनुक्ताग्राहिणम्** = कही हुई बात को न माननेवाला। **पद्मनाभ:** = कृष्ण। **स्वैरमासताम्** = आराम से बैठें। **आज्ञप्ता** = आज्ञा देनेवाला। **अनामयम्** = आरोग्य। **दायाद्यम्**= हिस्सा। **शमाय** = शान्ति के लिए। **पिष्टपेषणम्** = बार-बार कहना।